भगलिङ्गस्य संयोगात् रमते संपुटो हि सः ॥"
इति रतिमञ्जरी ॥

सम्पुटकः, पुं, (सम्पुट्यते इति । सं + पुट + क्वन् ।) आधारविशेषः । सँपुड़ा इति ख्यातः । इति भरतः ॥ तत्पर्य्यायः । समुद्गकः २ । इत्यमरः । २ । ६ । १३६ ॥ समुद्गः २ सम्पुटः ४ । इति हेमचन्द्रः ॥

सम्पूर्णं, त्रि, (सं + पॄ + क्तः ।) समग्रम् । परिपूर्णम् । साङ्गम् । यथा,—
"गृहीतेऽस्मिन् व्रते देव ! यद्यपूर्णे त्वहं म्रिये ।
तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्द्दन ! ॥"
इति तिथ्यादितत्त्वम् ॥

सम्पूर्णः, पुं, (सं + पॄ + क्तः ।) रागस्य जातिविशेषः । स तु सप्तस्वरमिश्रितरागिणः । यथा,
"औड़वः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तु षाड़वः ।
सम्पूर्णः सप्तभिः प्रोक्तो रागजातिस्त्रिधा मता ॥"
इति सङ्गीतरत्नाकरः ॥
अपि च । सम्पूर्णस्वराः सा ऋ ग म प ध नि । सम्पूर्णरागाः सप्तभिः स्वरैर्यथा । नाटवसन्तादयः । इति सङ्गीतदामोदरः ॥

सम्पूर्णा, स्त्री, (सम्पूर्ण + टाप् ।) एकादशीविशेषः । सा तु पूर्व्वारुणोदयव्यापिनी सती षष्टिदण्डात्मिका । यथा,—
"आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता ।
सैकादशी हि संपूर्णा विद्धान्या परिकीर्त्तिता ॥"
इति तिथ्यादितत्त्वम् ॥

सम्पृक्तः, त्रि, (सं + पृच् + क्तः ।) मिश्रितः । तत्पर्य्यायः । करम्बः २ कवरः ३ मिश्रः ४ खचितः ५ । इति हेमचन्द्रः ॥

सम्प्रति, व्य, (सम् च प्रति च द्वयोः समाहारः ।) अस्मिन् काले । तत्पर्य्यायः । एतर्हि २ इदानीं ३ अधुना ४ सांप्रतम् ५ । इत्यमरः । ३ । ४ । २३ ॥ (यथा, भागवते । ७ । १ । १७ ।
"सम्प्रत्यमर्षी गोविन्दे दन्तवक्त्रश्च दुर्म्मतिः ॥")

सम्प्रतिः, पुं, अतीतकल्पीयार्हद्भेदः । इति हेमचन्द्रः ॥

सम्प्रतिपत्तिः, स्त्री, (सं + प्रति + पद् + क्तिन् ।) उत्तरविशेषः । यथा,—
"मिथ्यासंप्रतिपत्तिश्च प्रत्यवस्कन्दनं तथा ।
प्राङ्न्यायाश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः ॥
श्रुत्वाभियोगं प्रत्यर्थी यदि तं प्रतिपद्यते ।
सा तु संप्रतिपत्तिः स्यात्शास्त्रविद्भिरुदाहृता ॥"
अभियुज्यते अभियोगः । प्रतिपद्यते अङ्गीकरोति । तं साध्यार्थम् । इति व्यवहारतत्त्वम् ॥ (सौमनस्यम् । यथा, माघे । १६ । ३८ ।
"न तथा भङ्गुरः प्राप्तमानसम्प्रतिपत्तिषु ।
रणोत्सर्गेषु भयं मानमं प्रति पत्तिषु ॥")

सम्प्रतिरोधकं, त्रि, (सम्यक्प्रकारेण प्रतिरुणद्धीति । सं + प्रति + रुध + ण्वुल् ।) प्रतिबन्धकम् । संप्रतिपूर्व्वरुधधातोर्णकप्रत्ययेन निष्पन्नम् ॥

सम्प्रतीतिः, स्त्री, सम्यक्ख्यातिः । सम्यग्ज्ञानम् । संप्रतिपूर्व्वेनधातोः क्तिन्प्रत्ययेन निष्पन्नम् ॥

सम्प्रदाता, [ऋ] त्रि, (सं + प्र + दा + तृच् ।) संप्रदानकर्त्ता । यथा, शुद्धितत्त्वे कात्यायनवचनम् ।
"त्रयाणामुदकं कार्य्यं त्रिषु पिण्डः प्रवर्त्तते ।
चतुर्थं संप्रदातैषां पञ्चमो नोपपद्यते ॥"

सम्प्रदानं, क्ली, (सं + प्र + दा + ल्युट् ।) सम्यक्प्रकारेण दानम् । षट्कारकान्तर्गतकारकविशेषः । स च दितसाद्भूयाक्रोधेर्षासूयाचिद्रोहस्याह्नुश्लाघस्पृहिशप्राधीच्छाप्रतिश्रुप्रत्यनुगृधार्य्यर्थानां विषयः । तत्र चतुर्थी विभक्तिः स्यात् । मुख्यसंप्रदानन्तु प्रकृष्टं दानं यो लभते सः । तथा चोक्तम् ।
"सम्प्रदानं तदेव स्यात् पूजानुग्रहकाम्यया ।
दीयमानेन संयोगात् स्वामित्वं लभते यदि ॥"
इति मुग्धबोधव्याकरणटीकायां दुर्गादासः ॥
अपि च ।
"गत्यादिभिन्ने धात्वर्थे चतुर्थ्यां विग्रहस्य या ।
यः स्वार्थो बोधनीयस्तत् संप्रदानत्वमीरितम् ॥"
गत्यादिभिन्ने यद्धातूपस्थाप्य यादृशार्थे विग्रहस्य चतुर्थ्या यः स्वार्थो बोधयितुं शक्यते स तद्धातूपस्थाप्य तादृशक्रियायां संप्रदानत्वमुच्यते । ब्राह्मणाय दानं धनस्य इत्यादौ ददातेः स्वत्वजनकत्यागोऽर्थः तन्निविष्टे च स्वत्वे ब्राह्मणादेः प्रतियोगित्वं निरूपितत्वं वा चतुर्थ्या बोध्यते इति तदेव तत्र संप्रदानत्वं ब्राह्मणादिप्रतियोगिकं यद्वनवृत्तिस्वत्वं तज्जनकस्त्याग इत्येवं तत्र प्रत्ययात् धात्वर्थतावच्छेदकीभूतस्वत्वाख्यफलवत्तया धनादेर्दानकर्म्मत्वात् । न चैवं पशुकामनया यागकरणदशायां चैत्रः स्वात्मने पशुं ददातीत्यपि प्रयोगापत्तिः तादृशयागस्य चैत्रीयं यत् पशुनिष्ठं स्वत्वं तज्जनकत्यागत्वादिति वाच्यं स्वत्वध्वंसजनकक्रियापर्य्यवसन्नस्य त्यागस्यैकदेशे स्वत्वध्वंसेऽपि द्वितीयाद्यर्थस्यान्वयेन पशुफलकयागे पशुनिष्ठस्य स्वत्वध्वंसस्य जनकत्वविरहादेतद्वाक्यस्याप्रमाणत्वात् । ग्रामाय गत इत्यादौ विग्रहस्य चतुर्थ्या धात्वर्थे बोध्यमपि कर्म्मत्वं न गत्यादिभिन्ने । वृक्षाय सेचक इत्यादौ गत्यादिभिन्ने चतुर्थ्या बोधनीयोऽपि संवर्द्धयितुमित्यादि तुमर्थो न विग्रहस्येति न तत्र प्रसङ्गः । संप्रदानशब्दस्तु स्वाश्रयगोचरत्यागजन्यस्वत्वस्य प्रतियोगिन्येव शक्त इति स्वत्वप्रतियोगित्वं संप्रदानमित्यादिको न प्रयोगः । न च दानस्य स्वत्वहेतुत्वे प्रमाणाभावः ।
'सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥'
इत्यादि मन्वादिवचनैस्तस्य स्वत्वहेतुत्वाप्रतिपादनादिति वाच्यम् । ब्राह्मणाय त्यक्तायां गवि गौरियं ब्राह्मणस्य न तु ममेत्यादि सार्व्वजनीनप्रतीतेरेव तत्र प्रमाणत्वात् प्रदानं स्वाम्यकारणमिति वचनाच्च अतएव विदेशस्थं पात्रमुद्दिश्य त्यक्तधने स्वीकारमन्तरेणैव पात्रस्य मरणस्थले पितृदायत्वेन तद्धनं पुत्त्रादिभिर्विभज्य गृह्यते अन्यथा तैरिव उदासीनैरपि तद्धनस्यारण्यकुशादेरिवोपादाने यथेष्टनियोगे च प्रत्यवायो न स्यात् नन्वेवं दानादेव स्वत्वसिद्धेर्दत्तवस्तुनि स्वीकारो व्यर्थं इति चेन्न लब्ध्वा चाष्टगुणं फलमित्यादि स्मृतेः प्रतिगृहीतद्रव्यदानस्य फलविशेषं प्रति हेतुत्वेन तादृशफलसम्पत्त्यर्थमेव प्रतिग्रहस्योपयोगात् याजनाध्यापनप्रतिग्रहैर्द्विजो धनमर्ज्जयेदित्यादिश्रुत्या प्रागुक्तस्मृत्या च प्रतिग्रहस्यापि स्वत्वहेतुत्वबोधनाच्च । स्वत्वजनकव्यापारस्यैवार्ज्जनपदार्थत्वात् । दासाय भक्तं ददाति भृतकाय वेतनं ददातीत्यादावपि स्वत्वजनकत्यागं प्रतिपादयन् ददातिर्मुख्य एव पुण्यजनकन्तु न तादृशं दानमवैधत्वात् । यत्तु स्वीकारजन्यस्य स्वत्वस्य जनकस्त्यागो दानं मनसा पात्रमुद्दिश्य धनत्यागन्तु न दानं किन्तूत्सर्गमात्रं प्रतिग्रहजन्यस्वत्वं प्रति हेतुभूतवैधत्यागस्यैव तथात्वात् उपेक्षा तु स्वत्वध्वंसमात्रजनकस्त्यागो न तु तत्र स्वत्वजनकस्यान्तर्भाव इति मैथिलैरुक्तं तन्न युक्तं लाघवेन स्वत्वजनकत्यागस्यैव ददात्यर्थत्वात् । तिलानस्मै प्रतियच्छति तुरगमस्मै विक्रीणीते इत्यादौ द्रव्यान्तरग्रहणपूर्व्वकं दानमेव प्रतिदानम् । मूल्यग्रहणपूर्व्वकं दानमेव विक्रय इति तत्रापि मुख्यमेव संप्रदानत्वं चतुर्थ्या बोध्यते । तिलादिकञ्च न मूल्यं पणपुराणादेरेव शास्त्रे तथात्वोपदेशात् । अदृष्टार्थं दत्तस्यैव च स्वीकारः प्रतिग्रह इति परेण प्रतिदत्तस्य विक्रीतस्य वा तिलतुरगादेः स्वीकारो न दोषावहः । मैत्राय रोचते मोदक इत्यत्र चतुर्थ्या धात्वर्थान्वितं आधेयत्वं धातुना च भक्ष्यत्वप्रकारकेच्छोपस्थाप्यते तिङा तु प्रकाशत इत्यादाविव विषयत्वलक्षणं कर्तृत्वं तथा च मैत्रनिष्ठायाः भक्ष्यत्वप्रकारकेच्छाया विषयतावान् मोदकः इत्याकारकस्तत्र बोधः । गुरवे गां धारयते इत्यत्र धृङा गृहावस्थितिः द्वितीयया तदन्वितं कर्तृत्वं चतुर्थ्या च तन्निविष्टगृहान्वितं सम्बन्धित्वमुपस्थाप्यते तेन गोकर्तृकाया गुरुसम्बन्धिगृहावस्थितेरनुकूलव्यापारवान् इत्याकारकस्तत्र बोधः । धातूत्तरणिचा व्यापारबोधनादिति कालापाः । पाणिनीयास्तु धारेरुत्तमर्ण इति सूत्रानुसारेण चैत्राय शतं धारयते इत्यादाविव गुरवे गां धारयते इत्यादावपि ऋणग्रहणं धारणं दत्तत्वञ्च चतुर्थ्यर्थः तथा च गुरुदत्तां गां ऋणत्वेन गृह्णाति इत्याकारस्तत्र वाक्यार्थः पश्चात् शोध्यत्वेनाङ्गीकृत्य गृहीतस्य द्रव्यस्य ऋणमित्याहुः । पुत्त्राय राध्यति पुत्त्रायेक्षत इत्यादौ दैवनिरूपणं धात्वर्थः तन्निविष्टे च दैवे शुबर्थस्य सम्बन्धस्यान्वयस्तेन पुत्त्रस्य दैवं निरूपयति इत्येवं तत्र बोधः । गुरवे गां